# Urubhangam by Bhasa

# મહાકવિશ્રીભાસપ્રણીતમ્ ઊરુભઙ્ગમ્

## Document Information

Text title : mahAkavishrIbhAsapraNItam UrubhaNgam

File name : Urubhanga.itx

Category : major_works

Location : doc_z_misc_major_works

Author : bhAsa

Transliterated by : Arun questions.Sanskrit at gmail.com http://learnsanskrit.org/tools/sanscript

Proofread by : Arun questions.Sanskrit at gmail.com

Latest update : January 23, 2011

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# મહાકવિશ્રીભાસપ્રણીતમ્ ઊરુભઙ્ગમ્

॥ શ્રીઃ॥

શ્રીગણેશાય નમઃ ।

(નાન્દ્યન્તે તતઃ પ્રવિશતિ સૂત્રધારઃ)

સૂત્રધારઃ –

ભીષ્મદ્રોણતટાં જયદ્રથજલાં ગાન્ધારરાજહ્રદાં
કર્ણદ્રૌણિકૃપોર્મિનક્રમકરાં દુર્યોધનસ્રોતસમ્ ।
તીર્ણઃ શત્રુનદીં શરાસસિકતાં યેન પ્લવેનાર્જુનઃ
શત્રૂણાં તરણેષુ વઃ સ ભગવાનસ્તુ પ્લવઃ કેશવઃ ॥ ૧॥

એવમાર્યમિશ્રાન્ વિજ્ઞાપયામિ । અયે કિન્નુખલુ મયિ વિજ્ઞાપનવ્યગ્રે
શબ્દ ઇવ શ્રૂયતે । અઙ્ગ ! પશ્યામિ ।

(નેપથ્યે)

એતે સ્મો ભોઃ ! એતે સ્મઃ ।
સૂત્રધારઃ – ભવતુ, વિજ્ઞાતમ્ ।

(પ્રવિશ્ય)

પારિપાર્શ્વકઃ – ભાવ ! કુતોનુખલ્વેતે,

સ્વર્ગાર્થમાહવમુખોદ્યતગાત્રહોમા
નારાચતોમરશતૈર્વિષમીકૃતાઙ્ગાઃ ।
મત્તદ્વિપેન્દ્રદશનોલ્લિખિતૈઃ શરીરૈર્
અન્યોન્યવીર્યનિકષાઃ પુરુષા ભ્રમન્તિ ॥ ૨॥

સૂત્રધારઃ – મારિષ કિં નાવગચ્છસિ । તનયશતનયશૂન્યે
દુર્યોધનાવશેષે ધૃતરાષ્ટ્રપક્ષે, પાણ્ડવજનાર્દનાવશિષ્ટે
યુધિષ્ઠિરપક્ષે, રાજ્ઞાં શરીરસમાકીર્ણે સમન્તપઞ્ચકે,

એતદ્ રણાહતગજાશ્વનરેન્દ્રયૌધં
સઙ્કીર્ણલેખ્યમિવ ચિત્રપટં પ્રવિદ્ધમ્ ।
યુદ્ધે વૃકોદરસુયોધનયોઃ પ્રવૃત્તે
યૌધા નરેન્દ્રનિધનૈકગૃહં પ્રવિષ્ટાઃ ॥ ૩॥

(નિષ્ક્રાન્તૌ)

સ્થાપના ।

ऽऽऽ

(તતઃ પ્રવિશન્તિ ભટાસ્ત્રયઃ)

સર્વે – એતે સ્મો ભોઃ ! એતે સ્મઃ ।

પ્રથમઃ –

વૈરસ્યાક્વથનં બલસ્ય નિકષં માનપ્રતિષ્ઠાગૃહં
યુદ્ધેષ્વપ્સરસાં સ્વયંવરસભાં શૌર્યપ્રતિષ્ઠાં નૃણામ્ ।
રાજ્ઞાં પશ્ચિમકાલવીરશયનં પ્રાણાગ્નિહોમક્રતું
સમ્પ્રાપ્તા રણસંજ્ઞમાશ્રમપદં રાજ્ઞાં નભઃસઙ્ક્રમમ્ ॥ ૪॥

દ્વિતીયઃ – સમ્યગ્ ભવાનાહ ।

ઉપલવિષમા નાગેન્દ્રાણાં શરીરધરા ધરા
દિશિ દિશિ કૃતા ગૃધ્રાવાસા હતાતિરથા રથાઃ ।
અવનિપતયઃ સ્વર્ગં પ્રાપ્તાઃ ક્રિયામરણે રણે
પ્રતિમુખમિમે તત્તત્ કૃત્વા ચિરં નિહતાહતાઃ ॥ ૫॥

તૃતીયઃ – એવમેતત્ ।

કરિવરકરયૂપો બાણવિન્યસ્તદર્ભો
હતગજચયનોચ્ચો વૈરવહ્નિપ્રદીપ્તઃ ।
ધ્વજવિતતવિમાનઃ સિંહનાદોચ્ચમન્ત્રઃ
પતિતપશુમનુષ્યઃ સંસ્થિતો યુદ્ધયજ્ઞઃ ॥ ૬॥

પ્રથમઃ – ઇદમપરં પશ્યેતાં ભવન્તૌ ।

એતે પરસ્પરશરૈર્હૃતજીવિતાનાં
દેહૈ રણાજિરમહીં સમુપાશ્રિતાનામ્ ।

કુર્વન્તિ ચાત્ર પિશિતાર્દ્રમુખા વિહઙ્ગા
રાજ્ઞાં શરીરશિથિલાનિ વિભૂષણાનિ ॥ ૭॥

દ્વિતીયઃ –

પ્રસક્તનારાચનિપાતપાતિતઃ
સમગ્રયુદ્ધોદ્યતકલ્પિતો ગજઃ ।
વિશીર્ણવર્મા સશરઃ સકાર્મુકો
નૃપાયુધાગારમિવાવસીદતિ ॥ ૮॥

તૃતીયઃ – ઇદમપરં પશ્યેતાં ભવન્તૌ ।

માલ્યૈર્ધ્વજાગ્રપતિતૈઃ કૃતમુણ્ડમાલં
રત્નૈકસાયકવરં રથિનં વિપન્નમ્ ।
જામાતરં પ્રવહણાદિવ બન્ધુનાર્યો
હૃષ્ટાઃ શિવા રથમુખાદવતારયન્તિ ॥ ૯॥

સર્વે – અહોતુખલુ
નિહતપતિતગજતુરગનરરુધિરકલિલભૂમિપ્રદેશસ્ય
વિક્ષિપ્તવર્મચર્માતપત્રચામરતોમરશરકુન્તકવચકબન્ધાદિપર્યાકુલસ્ય
શક્તિપ્રાસહાટકભિણ્ડિપાલશૂલમુસલમુદ્ગરવરાહકર્ણકણયકર્પણ-
શઙ્કુત્રાસિગદાદિભિરાયુધૈરાકીર્ણસ્ય સમન્તપઞ્ચકસ્ય પ્રતિભયતા ।

પ્રથમઃ – ઇહ હિ,

રુધિરસરિતો નિસ્તીર્યન્તે હતદ્વિપસઙ્ક્રમા
નૃપતિરહિતૈઃ સ્રસ્તૈઃ સૂતૈર્વહન્તિ રથાન્ હયાઃ ।
પતિતશિરસઃ પૂર્વાભ્યાસાદ્ દ્રવન્તિ કબન્ધકાઃ
પુરુષરહિતા મત્તા નાગા ભ્રમન્તિ યતસ્તતઃ ॥ ૧૦॥

દ્વિઃતીયઃ – ઇદમપરં પશ્યેતાં ભવન્તૌ । એતે,

ગૃધ્રા મધૂકમુકુલોન્નતપિઙ્ગલાક્ષા
દૈત્યેન્દ્રકુઞ્જરનતાઙ્કુશતીક્ષ્ણતુણ્ડાઃ ।
ભાન્ત્યમ્બરે વિતતલમ્બવિકીર્ણપક્ષા
માંસૈઃ પ્રવાલરચિતા ઇવ તાલવૃન્તાઃ ॥ ૧૧॥

તૃતીયઃ –
એષા નિરસ્તહયનાગનરેન્દ્રયૌધા

વ્યક્તીકૃતા દિનકરોગ્રકરૈઃ સમન્તાત્ ।
નારાચકુન્તશરતોમરખઙ્ગકીર્ણા
તારાગણં પતિતમુદ્વહતીવ ભૂમિઃ ॥ ૧૨॥

પ્રથમઃ – ઈદૃશ્યામપ્યવસ્થાયામવિમુક્તશોભા વિરાજન્તે ક્ષત્રિયાઃ । ઇહ હિ,

સત્રોદ્વર્તિતનેત્રષટ્પદગણા તામ્રોષ્ઠપત્રોત્કરા
ભ્રૂભેદાઞ્ચિતકેસરા સ્વમકુટવ્યાવિદ્ધસંવર્તિકા ।
વીર્યાદિત્યવિબોધિતા રણમુખે નારાચનાલોન્નતા
નિષ્કમ્પા સ્થલપદ્મિનીવ રચિતા રાજ્ઞામભીતૈર્મુખૈઃ ॥૧૩॥

દ્વિતીયઃ – ઈદૃશાનામપિ ક્ષત્રિયાણાં મૃત્યુઃ પ્રભવતિ । ન શક્યં
ખલુ વિષમસ્થૈઃ પુરુષૈ રાજબલાધાનં કર્તુમ્ ।

તૃતીયઃ – કિં ચ રે પ્રભવતિ ક્ષત્રિયાણામિતિ ।

પ્રથમઃ – કઃ સંશયઃ ।

દ્વિતીયઃ – મા મા ભવાનેવમ્ ।

સ્પૃષ્ટ્વા ખાણ્ડવધૂમરઞ્જિતગુણં સંશપ્તકોત્સાદનં
સ્વર્ગાક્રન્દહરં નિવાતકવચપ્રાણોપહારં ધનુઃ ।
પાર્થેનાદ્ય બલાન્મહેશ્વરરણક્ષેપાવશિષ્ટૈઃ શરૈર્
દર્પોત્સિક્તવશા નૃપા રણમુખે મૃત્યોઃ પ્રતિગ્રાહિતાઃ ॥૧૪॥

સર્વે – અયે શબ્દઃ ।

કિં મેઘા નિનદન્તિ વજ્રપતનૈશ્ચૂર્ણીકૃતાઃ પર્વતા
નિર્ઘાતૈસ્તુમુલસ્વનપ્રતિભયૈઃ કિં દાર્યતે વા મહી ।
કિં મુઞ્ચત્યનિલાવધૂતચપલક્ષુબ્ધોર્મિમાલાકુલં
શબ્દં મન્દરકન્દરોદરદરીઃ સંહત્ય વા સાગરઃ ॥૧૫॥

ભવતુ, પશ્યામસ્તાવત્ ।

(સર્વે પરિક્રામન્તિ)

પ્રથમઃ – અયે એતત્ ખલુ દ્રૌપદીકેશધર્ષણાવમર્ષિતસ્ય
પાણ્ડવમધ્યમસ્ય ભીમસેનસ્ય ભ્રાતૃશતવધક્રુદ્ધસ્ય
મહારાજદુર્યોધનસ્ય ચ દ્વૈપાયનહલાયુધકૃષ્ણવિદુરપ્રમુખાનાં
કુરુયદુકુલદૈવતાનાં પ્રત્યક્ષં પ્રવૃત્તં ગદાયુદ્ધમ્ ।

દ્વિતીયઃ –

ભીમસ્યોરસિ તપ્તકાઞ્ચનશિલાપીને પ્રતિસ્ફાલિતે
ભિન્ને વાસવહસ્તિહસ્તકઠિને દુર્યોધનાંસસ્થલે ।
અન્યોન્યસ્ય ભુજદ્વયાન્તરતટેષ્વાસજ્યમાનાયુધે
યસ્મિંશ્ચણ્ડગદાભિઘાતજનિતઃ શબ્દઃ સમુત્તિષ્ઠતિ ॥૧૬॥

તૃતીયઃ – એષ મહારાજઃ,

શિષ્ટોત્કમ્પનવલ્ગમાનામકુટઃ ક્રોધાધિકાક્ષાનનઃ
સ્થાનાક્રામણવામનીકૃતતનુઃ પ્રત્યગ્રહસ્તોચ્છ્રયઃ ।
યસ્યૈષા રિપુશોણિતાર્દ્રકલિલા ભાત્યગ્રહસ્તે ગદા
કૈલાસસ્ય ગિરેરિવાગ્રશિખરોદ્ધૂતા મહેન્દ્રાશનિઃ ॥૧૭॥

પ્રથમઃ – એષ સમ્પ્રહારરુધિરસિક્તાઙ્ગસ્તાવદ્ દૃશ્યતાં પાણ્ડવઃ ।

નિર્ભિન્નાગ્રલલાટવાન્તરુધિરો ભગ્નાંસકૂટદ્વયઃ
સાન્દ્રૈર્નિર્ગલિતપ્રહારરુધિરૈરાર્દ્રીકૃતોરઃસ્થલઃ ।
ભીમો ભાતિ ગદાભિઘાતરુધિરક્લિન્નાવગાઢવ્રણઃ
શૈલો મેરુરિવૈષ ધાતુસલિલાસારોપદિગ્ધોપલઃ ॥ ૧૮॥

દ્વિતીયઃ –

ભીમાં ગદાં ક્ષિપતિ ગર્જતિ વલ્ગમાનઃ
શીઘ્રં ભુજં હરતિ તસ્ય કૃતં ભિનત્તિ ।
ચારીં ગતિં પ્રચરતિ પ્રહરત્યભીક્ષ્ણાં
સંશિક્ષિતો નરપતિર્બલવાંસ્તુ ભીમઃ ॥ ૧૯॥

તૃતીયઃ – એષ વૃકોદરઃ,

શિરસિ ગુરુનિખાતસ્રસ્તરક્તાર્દ્રગાત્રો
ધરણિધરનિકાશઃ સંયુગેષ્વપ્રમેયઃ ।
પ્રવિશતિ ગિરિરાજો મેદિનીં વજ્રદગ્ધઃ
શિથિલવિસૃતધાતુર્હેમકૂટો યથાદ્રિઃ ॥ ૨૦॥

એષ ગાઢપ્રહારશિથિલીકૃતાઙ્ગં નિપતન્તં ભીમસેનં દૃષ્ટ્વા,

એકાગ્રાઙ્ગુલિધારિતોન્નતમુખો વ્યાસઃ સ્થિતો વિસ્મિતઃ

દ્વિતીયઃ –

દૈન્યં યાતિ યુધિષ્ઠિરોઽત્ર વિદુરો બાષ્પાકુલાક્ષઃ સ્થિતઃ ।

તૃતીયઃ –

સ્પૃષ્ટં ગાણ્ડિવમર્જુનેન ગગનં કૃષ્ણઃ સમુદ્વીક્ષતે

સર્વે –

શિષ્યપ્રીતિતયા હલં ભ્રમયતે રામો રણપ્રેક્ષકઃ ॥ ૨૧॥

પ્રથમઃ – એષ મહારાજઃ,

વીર્યાલયો વિવિધરત્નવિચિત્રમૌલિર્
યુક્તોઽભિમાનવિનયદ્યુતિસાહસૈશ્ચ ।
વાક્યં વદત્યુપહસન્ન તુ ભીમ દીનં
વીરો નિહન્તિ સમરેષુ ભયં ત્યજેતિ ॥ ૨૨॥

દ્વિતીયઃ – એષ ઇદાનીમપહાસ્યમાનં ભીમસેનં દૃષ્ટ્વા
સ્વમૂરુમભિહત્ય કામપિ સંજ્ઞાં પ્રયચ્છતિ જનાર્દનઃ ।

તૃતીયઃ – એષ સંજ્ઞયા સમાશ્વાસિતો મારુતિઃ,

સંહૃત્ય ભ્રુકુટી લલાટવિવરે સ્વેદં કરેણાક્ષિપન્
બાહુભ્યાં પ્રતિગૃહ્ય ભીમવદનશ્ચિત્રાઙ્ગદાં સ્વાં ગદામ્ ।
પુત્રં દીનમુદીક્ષ્ય સર્વગતિના લબ્ધ્વેવ દત્તં બલં
ગર્જન્ સિંહવૃષેક્ષણઃ ક્ષિતિતલાદ્ ભૂયઃ સમુત્તિષ્ઠતિ ॥ ૨૩॥

પ્રથમઃ – હન્ત પુનઃ પ્રવૃત્તં ગદાયુદ્ધમ્ । અનેન હિ,

ભૂમૌ પાણિતલે નિઘૃષ્ય તરસા બાહૂ પ્રમૃજ્યાધિકં
સન્દષ્ટોષ્ઠપુટેન વિક્રમબલાત્ ક્રોધાધિકં ગર્જતા ।
ત્યક્ત્વા ધર્મઘૃણાં વિહાય સમયં કૃષ્ણસ્ય સંજ્ઞાસમં
ગાન્ધારીતનયસ્ય પાણ્ડુતનયેનોર્વોર્વિમુક્તા ગદા ॥ ૨૪॥

સર્વે – હા ધિક્ પતિતો મહારાજઃ ।

તૃતીયઃ – એષ રુધિરપતનદ્યોતિતાઙ્ગં નિપતન્તં કુરુરાજં
દૃષ્ટ્વા ખમુત્પતિતો ભગવાન્ દ્વૈપાયનઃ । ય એષઃ,

હેલાસંવૃતલોચનેન હલિના નેત્રોપરોધઃ કૃતો
દૃષ્ટ્વા ક્રોધનિમીલિતં હલધરં દુર્યોધનાપેક્ષયા ।

સમ્ભ્રાન્તૈઃ કરપઞ્જરાન્તરગતો દ્વૈપાયનજ્ઞાપિતો
ભીમઃ કૃષ્ણકરાવલમ્બિતગતિર્નિર્વાહ્યતે પાણ્ડવૈઃ ॥ ૨૫॥

પ્રથમઃ – અયે અયમપ્યમર્ષોન્મીલિતરભસલોચનો
ભીમસેનાપક્રમણમુદ્વીક્ષમાણ ઇત એવાભિવર્તતે ભગવાન્ હલાયુધઃ ।
ય એષઃ,

પ્રચલલલિતમૌલિઃ ક્રોધતામ્રાયતાક્ષો
ભ્રમરમુખવિદષ્ટાં કિઞ્ચિદુત્કૃષ્ય માલામ્ ।
અસિતતનુવિલમ્બિસ્રસ્તવસ્ત્રાનુકર્ષી
ક્ષિતિતલમવતીર્ણઃ પારિવેષીવ ચન્દ્રઃ ॥ ૨૬॥

દ્વિતીયઃ – તદાગમ્યતાં વયમપિ તાવન્મહારાજસ્ય પ્રત્યનન્તરીભવામઃ ।

ઉભૌ – બાઢમ્ । પ્રથમઃ કલ્પઃ ।

(નિષ્ક્રાન્તાઃ)

વિષ્કમ્ભકઃ ।

ऽऽऽ

(તતઃ પ્રવિશતિ બલદેવઃ)

બલદેવઃ – ભો ભોઃ પાર્થિવાઃ ! ન યુક્તમિદમ્ ।

મમ રિપુબલકાલં લાઙ્ગલં લઙ્ઘયિત્વા
રણગતમતિસન્ધિં માં ચ નાવેક્ષ્ય દર્પાત્ ।
રણશિરસિ ગદાં તાં તેન દુર્યોધનોર્વોઃ
કુલવિનયસમૃદ્ધ્યા પાતિતઃ પાતયિત્વા ॥ ૨૭॥

ભો દુર્યોધન ! મુહૂર્તં તાવદાત્મા ધાર્યતામ્ ।

સૌભોચ્છિષ્ટમુખં મહાસુરપુરપ્રાકારકૂટાઙ્કુશં
કાલિન્દીજલદેશિકં રિપુબલપ્રાણોપહારાર્ચિતમ્ ।
હન્તોત્ક્ષિપ્યહલં કરોમિ રુધિરસ્વેદાર્દ્રપાકોત્તરે
ભીમસ્યોરસિ યાવદદ્ય વિપુલે કેદારમાર્ગાકુલમ્ ॥ ૨૮॥

(નેપથ્યે)

પ્રસીદતુ પ્રસીદતુ ભગવાન્ હલાયુધઃ ।

બલદેવઃ – એવાંગતોऽપ્યનુગચ્છતિ માં તપસ્વી દુર્યોધનઃ । એષઃ,

શ્રીમાન્ સંયુગચન્દનેન રુધિરેણાર્દ્રાનુલિપ્તચ્છવિર્
ભૂસંસર્પણરેણૂપાટલભુજો બાલવ્રતં ગ્રાહિતઃ ।
નિર્વૃત્તેऽમૃતમન્થને ક્ષિતિધરાન્મુક્તઃ સુરૈઃ સાસુરૈર્
આકર્ષન્નિવ ભોગમર્ણવજલે શ્રાન્તોજ્ઝિતો વાસુકિઃ ॥ ૨૯ ॥

(તતઃ પ્રવિશતિ ભગ્નોરુયુગલો દુર્યોધનઃ)

દુર્યોધનઃ – એષ ભોઃ !

ભીમેન ભિત્ત્વા સમયવ્યવસ્થાં
ગદાનિપાતક્ષતજર્જરોરુઃ ।
ભૂમૌ ભુજાભ્યાં પરિકૃષ્યમાનં
સ્વં દેહમર્ધોપરતં વહામિ ॥ ૩૦ ॥

પ્રસીદતુ પ્રસીદતુ ભગવાન્ હલાયુધઃ ।

ત્વત્પાદતોર્નિપતિતં પતિતસ્ય ભૂમાવ્
એતચ્છિરઃ પ્રથમમદ્ય વિમુઞ્ચ રોષમ્ ।
જીવન્તુ તે કુરુકુલસ્ય નિવાપમેઘા
વૈરં ચ વિગ્રહકથા ચ વયં ચ નષ્ટાઃ ॥ ૩૧ ॥

બલદેવઃ – ભો દુર્યોધના ! મુહૂર્તં તાવદાત્મા ધાર્યતામ્ ।

દુર્યોધનઃ – કિં ભવાન્ કરિષ્યતિ ।

બલદેવઃ – શ્રૂયતામ્,

આક્ષિપ્તલાઙ્ગલમુખોલ્લિખિતૈઃ શરીરૈર્
નિર્દારિતાંસહૃદયાન્મુસલપ્રહારૈઃ ।
દાસ્યામિ સંયુગહતાન્ સરથાશ્વનાગાન્
સ્વર્ગાનુયાત્રપુરુષાંસ્તવ પાણ્ડુપુત્રાન્ ॥ ૩૨ ॥

દુર્યોધનઃ – મા મા ભવાનેવમ્ ।

પ્રતિજ્ઞાવસિતે ભીમે ગતે ભ્રાતૃશતે દિવમ્ ।
મયિ ચૈવં ગતે રામ ! વિગ્રહઃ કિં કરિષ્યતિ ॥ ૩૩ ॥

બલદેવઃ – મત્પ્રત્યક્ષં વઞ્ચિતો ભવાનિત્યુત્પન્નો મે રોષઃ ।

દુર્યોધનઃ – વઞ્ચિત ઇતિ માં ભવાન્ મન્યતે ।

બલદેવઃ – કઃ સંશયઃ ।

દુર્યોધનઃ – હન્ત ભોઃ ! દત્તમૂલ્યા ઇવ મે પ્રાણાઃ । કુતઃ,

આદીપ્તાનલદારુણાજ્જતુગૃહાદ્ બુદ્ધ્યાત્મનિર્વાહિણા
યુદ્ધે વૈશ્રવણાલયેઽચલશિલાવેગપ્રતિસારિણા ।
ભીમેનાદ્ય હિડિમ્બરાક્ષસપતિપ્રાણપ્રતિગ્રાહિણા
યદ્યેવં સમવૈષિ માં છલાજિતં ભો રામ ! નાહં જિતઃ ॥ ૩૪॥

બલદેવઃ – ભીંઅસેન ઇદાનીં તવ યુદ્ધવઞ્ચનામુત્પાદ્ય સ્થાસ્યતિ ।

દુર્યોધનઃ – કિં ચાહં ભીમસેનેન વઞ્ચિતઃ ।

બલદેવઃ – અથ કેન ભવાનેવંવિધઃ કૃતઃ ।

રાજા – શ્રૂયતાં,

યેનેન્દ્રસ્ય સ પારિજાતકતરુર્માનેન તુલ્યં હૃતો
દિવ્યં વર્ષસહસ્રમર્ણવજલે સુપ્તશ્ચ યો લીલયા ।
તીવ્રાં ભીમગદાં પ્રવિશ્ય સહસા નિર્વ્યાજયુદ્ધપ્રિયસ્
તેનાહં જગતઃ પ્રિયેણ હરિણા મૃત્યોઃ પ્રતિગ્રાહિતાઃ ॥ ૩૫॥

(નેપથ્યે)

ઉસ્સરહ અય્યા ! ઉસ્સરહ । [ઉત્સરતાર્યાઃ ! ઉત્સરત ।]

બલદેવઃ – (વિલોક્ય) અયે અયમત્રભવાન્ ધૃતરાષ્ટ્રો ગાન્ધાર્યા દુર્જયેનાદેશિતમાર્ગોઽન્તઃપુરાનુબન્ધઃ શોકામભિભૂતહૃદય ઇત એવાભિવર્તતે । ય એષઃ,

વીર્યાકરઃ સુતશતપ્રવિભક્તચક્ષુર્
દર્પોદ્ધતઃ કનકયૂપવિલમ્બબાહુઃ ।
સૃષ્ટો ધ્રુવં ત્રિદિવરક્ષણજાતશઙ્કૈર્
દેવૈર્ અરાતિતિમિરાઞ્જલિતાડિતાક્ષઃ ॥ ૩૬॥

(તતઃ પ્રવિશતિ ધૃતરાષ્ટ્રો ગાન્દ્રારી દેવ્યૌ દુર્જયશ્ચ)

ધૃતરાષ્ટ્રઃ – પુત્ર! ક્વાસિ ।

ગાન્ધારી – પુત્તઅ ! કહિં સિ । [પુત્રક! ક્વાસિ ।]

દેવ્યૌ – મહારાજ ! કહિં સિ । [મહારાજ ! કુત્રાસિ ।]

ધૃતરાષ્ટ્ર – ભો! કષ્ટમ્ ।

વઞ્ચનાનિહતં શ્રુત્વા સુતમદ્યાહવે મમ ।
મુખમન્તર્ગતાસ્રાક્ષમન્દમન્ધતરં કૃતમ્ ॥ ૩૭॥

ગાન્ધારિ ! કિં ધરસે ।

ગાન્ધારી – જીવાવિદ હ્મિ મન્દભા । [જીવિતાસ્મિ મન્દભાગા ।]

દેવ્યૌ – મહારાજ ! મહારાજ ! । [મહારાજ ! મહારાજ ! ।]

રાજા – ભોઃ ! કષ્ટમ્ । યન્મમાપિ સ્ત્રિયો રુદન્તિ ।

પૂર્વં ન જાનામિ ગદાભિઘાત-
રુજામિદાનીં તુ સમર્થયામિ ।
યન્મે પ્રકાશીકૃતમૂર્ધજાનિ
રણં પ્રવિષ્ટાન્યવરોધનાનિ ॥ ૩૮॥

ધૃતરાષ્ટ્રઃ – ગાન્ધારિ ! કિં દૃશ્યતે દુર્યોધનનામધેયઃ કુલમાની ।

ગાન્ધારી – મહારાજ ! ણ દિસ્સદિ । [મહારાજ ! ન દૃશ્યતે ।]

ધૃતરાષ્ટ્રઃ – કથં ન દૃશ્યતે । અદ્યાસ્મિ યોઽહમન્વેષ્ટવ્યે
કાલે પુત્રં ન પશ્યામિ । કૃતાન્તહતક !

રિપુસમરવિમર્દં માનવીર્યપ્રદીપ્તં
સુતશતમતિધીરં વીરમુત્પાદ્ય માની ।
ધરણિતલવિકીર્ણં કિં સ યોગ્યો ન ભોક્તું
સકૃદપિ ધૃતરાષ્ટ્રઃ પુત્રદત્તં નિવાપમ્ ॥ ૩૯॥

ગાન્ધારી – જાદ ! સુયોધણ । દેહિ મે પડિવઅણમ્ ।
પુત્તસદવિણાસદુક્ખિદં મહારાજં ચ મન્દભાજમ્ । [જાત ! સુયોધન
! દેહિ મે પ્રતિવચનમ્ । પુત્રશતવિનાશદુઃખિતં મહારાજં ચ
મન્દભાગમ્ ।]

બલદેવઃ – અયે ઇયમત્રભવતી ગાન્ધારી ।

યા પુત્રપૌત્રવદનેષ્વકુતૂહલાક્ષી
દુર્યોધનાસ્તમિતશોકનિપીતધૈર્યા ।

અસ્રૈરજસ્રમધુના પતિધર્મચિહ્નમ્
આર્દ્રીકૃતં નયનબન્ધમિદં દધાતિ ॥ ૪૦॥

ધૃતરાષ્ટ્રઃ – પુત્ર ! દુર્યોધન ! અષ્ટાદશાક્ષૌહિણીમહારાજ ! ક્વાસિ ।

રાજા – અદ્યાસ્મિ મહારાજઃ ।

ધૃતરાષ્ટ્રઃ – પુત્રશતજ્યેષ્ઠ ! દેહિ મે પ્રતિવચનમ્ ।

દુર્યોધનઃ – અન્યન્દદામિ ખલુ વૃત્તાન્તમ્ । અનેન વૃત્તાન્તેન વ્રીડિતોઽસ્મિ ।

ધૃતરાષ્ટ્રઃ – એહિ પુત્ર । અભિવાદયસ્વ મામ્ ।

રાજા – અયમયમાગચ્છામિ । (ઉત્થાનં રૂપાયિત્વા પતતિ) હા ધિક્ ।
અયં મે દ્વિતીયઃ પ્રહારઃ । કષ્ટં ભોઃ !

હૃતં મે ભીમસેનેન ગદાપાતકચગ્રહે ।
સમમૂરુદ્વયેનાદ્ય ગુરોઃ પાદાભિવન્દનમ્ ॥ ૪૧॥

ગાન્ધારી – એત્થ જાદા ! । [અત્ર જાતે ! ।]

દેવ્યૌ – અય્યે ! ઇમા હ્મ । [આર્યે ! ઇમે સ્વઃ]

ગાન્ધારી – અણ્ણેસહ ભત્તારમ્ । [અન્વેષેથા ભર્તારમ્ ।]

દેવ્યૌ – ગચ્છામિ મન્દભા । [ગચ્છામિ મન્દભાગા]

ધૃતરાષ્ટ્રઃ – ક એષ ભોઃ ! મમ વસ્ત્રાન્તમાકર્ષન્ માર્ગમાદેશયતિ ।

દુર્જયઃ – તાદ ! અહં દુજ્જયો । [તાત ! અહં દુર્જયઃ ।]

ધૃતરાષ્ટ્ર – પૌત્ર ! દુર્જય ! પિતરમન્વિચ્છ ।

દુર્જયઃ – પરિસ્સન્તો ખુ અહમ્ । [પરિશ્રાન્તઃ ખલ્વહમ્ ।]

ધૃતરાષ્ટ્રઃ – ગચ્છ, પિતુરઙ્કે વિશ્રમયિષ્યસિ ।

દુર્જયઃ – તાદ ! અહં ગચ્છામિ । (ઉપસૃત્ય) તાદ ! કહિં સિ ।
[તાત ! અહં ગચ્છામિ । તાત ! કુત્રાસિ ।]

રાજા – અયે અયમપ્યાગતઃ । સર્વાવસ્થાયાં હૃદયસન્નિહિતઃ પુત્રસ્નેહો
માં દહતિ । કુતઃ,

દુઃખાનામનભિજ્ઞેયો મમાઙ્કશયનોચિતઃ ।
નિર્જિતં દુર્જયો દૃષ્ટ્વા કિન્નુ મામભિધાસ્યતિ ॥ ૪૨॥

દુર્જયઃ – અઅં મહારાઓ ભૂમીએ ઉવવિટ્ઠો । [અયં મહારાજો ભૂમ્યામુપવિષ્ટઃ ।]

રાજા – પુત્ર । કિમર્થમાગતઃ ।

દુર્જયઃ – તુવં ચિરાયસિ ત્તિ । [ત્વં ચિરાયસીતિ ।]

રાજા – અહો અસ્યામવસ્થાયાં પુત્રસ્નેહો હૃદયં દહતિ ।

દુર્જયઃ – અહં પિ ખુ દે અઙ્કે ઉવવિસામિ । (અઙ્કમારોહતિ) [અહંઅપિ
ખલુ તે અઙ્કે ઉપવિશામિ ।]

રાજા – (નિવાર્ય) દુર્જય ! દુર્જય ! ભોઃ ! કષ્ટમ્ ।

હૃદયપ્રીતિજનનો યો મે નેત્રોત્સવઃ સ્વયમ્ ।
સોઽયં કાલવિપર્યાસાચ્ચન્દ્રો વહ્નિત્વમાગતઃ ॥ ૪૩॥

દુર્જયઃ – અઙ્કે ઉવવેસં કિંણિમિત્તં તુવં વારેસિ । [અઙ્કે ઉપવેશ
કિન્નિમિત્તં ત્વં વારયસિ ।]

રાજા –

ત્યક્ત્વા પરિચિતં પુત્ર ! યત્રતત્ર ત્વયાસ્યતામ્ ।
અદ્યપ્રભૃતિ નાસ્તીદં પૂર્વભુક્તં તવાસનમ્ ॥ ૪૪॥

દુર્જય – કહિંણુખુ મહારાઓ ગમિસ્સદિ । [કુત્રનુખલુ મહારાજો ગમિષ્યતિ ।]

રાજા – ભ્રાતૃશતમનુગચ્છામિ ।

દુર્જયઃ – મં પિ તહિં ણેહિ । [મામપિ તત્ર નય ।]

રાજાં – ગચ્છ પુત્ર ! વૃકોદરં બ્રૂહિ ।

દુર્જયઃ – એહિ મહારાજ ! અણ્ણેસીઅસિ । [એહિ મહારાજ ! અન્વિષ્યસે ।]

રાજા – પુત્ર ! કેન ।

દુર્જયઃ – અય્યાએ, અય્યેણ, સવ્વેણ અન્તઉરેણ અ । [આર્યયાર્યેણ
સર્વેણાન્તઃપુરેણ ચ ।]

રાજા – ગચ્છ પુત્ર ! નાહમાગન્તું સમર્થઃ ।

દુર્જયઃ – અહં તુવં ણૈસ્સમ્ । [અહં ત્વાં નેષ્યામિ ।]

રાજા – બાલસ્ત્વમસિ પુત્ર ! ।

દુર્જયઃ – (પરિક્રમ્ય) અય્યા ! અઅં મહારાઓ । [આર્યાઃ ! અયં મહારાજઃ ।]

દેવ્યૌ – હા હા મહારાઓ । [હા હા મહારજઃ ।]

ધૃતરાષ્ટ્રઃ – ક્વાસૌ મહારજઃ ।

ગાન્ધારી – કહિં મે પુત્તઓ । [કુત્ર મે પુત્રકઃ ।]

દુર્જયઃ – અઅં મહારાઓ ભૂમિએ ઉવવિટ્ઠો । [અયં મહારાજો ભૂમ્યામુપવિષ્ટઃ ।]

ધૃતરાષ્ટ્રઃ – હન્ત ભોઃ ! કિમયં મહારાજઃ ।

યઃ કાઞ્ચનસ્તમ્ભસમપ્રમાણો
લોકે કિલૈકો વસુધાધિપેન્દ્રઃ ।
કૃતઃ સ મે ભૂમિગતસ્તપસ્વી
દ્વારેન્દ્રકીલાર્ધસમપ્રમાણઃ ॥ ૪૫॥

ગાન્ધારી – જાદ ! સુયોધણ ! પરિસ્સન્તો સિ । [જાત ! સુયોધન ! પરિશ્રાન્તોઽસિ ।]

રાજા – ભવત્યાઃ ખલ્વાહં પુત્રઃ ।

ધૃતરાષ્ટ્રઃ – કેયં ભીઃ ! ।

ગાન્ધારી – મહારાજ ! અહમભીદપુત્તપ્પાઇણી । [મહારાજ ! અહમભીતપુત્રપદાયિની ।]

રાજા – અદ્યોત્પન્નમિવાત્માનમવગચ્છામિ । ભોસ્તાત ! કિમિદાનિં વૈક્લવ્યેન ।

ધૃતરાષ્ટ્રઃ – પુત્ર ! કથં વિક્લવો ભવિષ્યામિ ।

યસ્ય વીર્યબલોત્સિક્તં સંયુગાધ્વરદીક્ષિતમ્ ।
પૂર્વં ભ્રાતૃશતં નષ્ટં ત્વય્યેકસ્મિન્ હતે હતમ્ ॥ ૪૬॥

(પતતિ)

રાજા – હા ધિક્ । પતિતોઽત્રભવાન્ । તાત ! સમાશ્વાસયાત્રભવતીમ્ ।

ધૃતરાષ્ટ્રઃ – પુત્ર ! કિમિતિ સમાશ્વસયામિ ।

રાજા – અપરાઙ્મુખો યુધિ હત ઇતિ । ભોસ્તાત ! શોકનિગ્રહેણ ક્રિયતાં મમાનુગ્રઃ ।

ત્વત્પાદમાત્રપ્રણતાગ્રમૌલિર્
જ્વલન્તમપ્યગ્નિમચિન્તયિત્વા ।
યેનૈવ માનેન સમં પ્રસૂતસ્
તેનૈવ માનેન દિવં પ્રયામિ ॥ ૪૭॥

ધૃતરાષ્ટ્રઃ –

વૃદ્ધસ્ય મે જીવિતનિસ્સ્પૃહસ્ય
નિસર્ગસમ્મીલિતલોચનસ્ય ।
ધૃતિં નિગૃહ્યાત્મનિ સમ્પ્રવૃત્તસ્
તીવ્રઃ સમાક્રામતિ પુત્રશોકઃ ॥ ૪૮॥

બલદેવઃ – ભોઃ કષ્ટમ્ ।

દુર્યોધનનિરાશસ્ય નિત્યાસ્તમિતચક્ષુષઃ ।
ન શક્નોમ્યત્રભવતઃ કર્તુમાત્મનિવેદનામ્ ॥ ૪૯॥

રાજા – વિજ્ઞાપયામ્યત્રભવતીમ્ ।

ગાન્ધારી – ભણાહિ જાદ ! । [ભણ જાત ! ।]

રાજા –

નમસ્કૃત્ય વદામિ ત્વાં યદિ પુણ્યં મયા કૃતમ્ ।
અન્યસ્યામપિ જાત્યં મે ત્વંએવ જનની ભવ ॥ ૫૦॥

ગાન્ધારી – મમ મણોરહો ખુ તુએ ભણિદો । [મમ મનોરથઃ ખલુ ત્વયા ભણિતઃ ।]

રાજા – માલવિ ! ત્વમપિ શ ૃણુ ।

ભિન્ના મે ભ્રુકુટી ગદાનિપતિતૈર્વ્યાયુદ્ધકાલોત્થિતૈર્
વક્ષસ્યુત્પતિતૈઃ પ્રહારરુધિરૈર્હારાવકાશો હૃતઃ ।
પશ્યેમૌ વ્રણકાઞ્ચનાઙ્ગદધરૌ પર્યાપ્તશોભૌ ભુજૌ
ભર્તા તે ન પરાઙ્મુખો યુધિ હતઃ કિં ક્ષત્રિયે રોદિષિ ॥ ૫૧॥

દેવી – બાળા એસા સહધમ્મચારિણી રોદામિ । [બાલા એષા સહધર્મચારિણી રોદામિ ।]

રાજા – પૌરવિ ! ત્વમપિ શ ૃણુ ।

વેદોક્તૈર્વિવિધૈર્મખૈરભિમતૈરિષ્ટં ધૃતા બાન્ધવાઃ
શત્રૂણામુપરિ સ્થિતં પ્રિયશતં ન વ્યંસિતાઃ સંશ્રિતાઃ ।
યુદ્ધેઽષ્ટાદશવાહિનીનૃપતયઃ સન્તાપિતા નિગ્રહે
માનં માનિનિ વીક્ષ્ય મે નહિ રુદન્ત્યેવંવિધાનાં સ્ત્રિયઃ ॥ ૫૨ ॥

પૌરવી – એક્કકિદપ્પવેસણિચ્ચા ણ રોદામિ । [એકકૃતપ્રવેશનિશ્ચયા ન રોદામિ ।]

રાજા – દુર્જય ! ત્વમપિ શૃણુ ।

ધૃતરાષ્ટ્રઃ – ગાન્ધારિ । કિન્નુખલુ વક્ષ્યતિ ।

ગાન્ધારી – અહં પિ તં જવ્વ ચિન્તેમિ । [અહમપિ તદેવ ચિન્તયામિ ।]

રાજા – અહમિવ પાણ્ડવાઃ શુશ્રૂષયિતવ્યાઃ તત્રભવત્યાશ્ચામ્બાયાઃ કુન્ત્યા નિદેશો વર્તયિતવ્યઃ । આભિમન્યોર્જનની દ્રૌપદી ચોભે માતૃવત્ પૂજયિતવ્યે । પશ્ય પુત્ર,

શ્લાઘ્યશ્રીરભિમાનદીપ્તહૃદયો દુર્યોધનો મે પિતા
તુલ્યેનાભિમુખં રણે હત ઇતિ ત્વં શોકમેવં ત્યજ ।
સ્પૃષ્ટ્વા ચૈવ યુધિષ્ઠિરસ્ય વિપુલં ક્ષૌમાપસવ્યં ભુજં
દેયં પાણ્ડુસુતૈસ્ત્વયા મમ સમં નામાવસાને જલમ્ ॥ ૫૩ ॥

બલદેવઃ – અહો વૈરં પશ્ચાત્તાપઃ સંવૃત્તઃ । અયે શબ્દ ઇવ

સન્નાહદુન્દુભિનિનાદવિયોગમૂકે
વિક્ષિપ્તબાણકવચવ્યજનાતપત્રે ।
કસ્યૈષ કાર્મુકરવો હતસૂતયોધે
વિભ્રાન્તવાયસગણં ગગનં કરોતિ ॥ ૫૪ ॥

(નેપથ્યે)

દુર્યોધનેનાતતકાર્મુકેણ
યો યુદ્ધયજ્ઞઃ સાહિતઃ પ્રવિષ્ટઃ ।
તમેવ ભૂયઃ પ્રવિશામ્યશૂન્યમ્
અધ્વર્યુણા વૃત્તમિવાશ્વમેધમ્ ॥ ૫૫ ॥

બલદેવઃ – અયે અયં ગુરુપુત્રોઽશ્વત્થામેત એવાભિવર્તતે । ય એષઃ,

સ્ફુટિતકમલપત્રસ્પષ્ટવિસ્તીર્ણદૃષ્ટી

રુચિરકનકયૂપવ્યાયતાલમ્બબાહુઃ ।
સરભસમયમુગ્રં કાર્મુકં કર્ષમાણઃ
સદહન ઇવ મેરુઃ શ઼ૃઙ્ગલગ્નેન્દ્રચાપઃ ॥ ૫૬॥

(તતઃ પ્રવિશત્યશ્વત્થામા)

અશ્વત્થામા – (પૂર્વોક્તમેવ પઠિત્વા) ભોઃ !
સમરસંરમ્ભોભયબલજલધિસઙ્ગમસમયસમુત્થિતશસ્ત્રનક્રકૃત્ત-
વિગ્રહાઃ સ્તોકાવશેષાઃ શ્વાસાનુબદ્ધમન્દપ્રાણાઃ સમરશ્લાઘિનો રાજાનઃ !
શ઼ૃણ્વન્તુ શ઼ૃણ્વન્તુ ભવન્તઃ ।

છલબલદલિતોરુઃ કૌરવેન્દ્રો ન ચાહમ્
શિથિલવિફલશસ્ત્રઃ સૂતપુત્રશ્ચ નાહમ્ ।
ઇહ તુ વિજયભૂમૌ દ્રષ્ટુમદ્યોદ્યતાસ્ત્રઃ
સરભસમહમેકો દ્રોણાપુત્રઃ સ્થિતોઽસ્મિ ॥ ૫૭॥

કિમનયા મમાપ્યપ્રતિલાભવિજયશ્લાઘયા સમરશ્રિયા । (પરિક્રમ્ય) મા
તાવત્ । મયિ ગુરુનિવપનવ્યગ્રે વઞ્ચિતઃ કુરુતિલકભૂતઃ કુરુરાજઃ ।
ક એતચ્છ્રદ્ધાસ્યતિ । કુતઃ,

ઉદ્યત્પ્રાઞ્જલયો રથદ્વિપગતાશ્ચાપદ્વિતીયૈઃ કરૈર્
યસ્યૈકાદશવાહિનીનૃપતયસ્તિષ્ઠન્તિ વાક્યોન્મુખાઃ ।
ભીષ્મો રામશરાવલીઢકવચસ્તાતશ્ચ યોદ્ધા રણે
વ્યક્તં નિર્જિત એવ સોઽપ્યતિરથઃ કાલેન દુર્યોધનઃ ॥ ૫૮॥

તત્ ક્વનુખલુ ગતો ગાન્ધારીપુત્રઃ । (પરિક્રમ્યાવલોક્ય) અયે
અયમભિહતગજતુરગનરરથપ્રાકારમધ્યગતઃ સમરપયોધિપારગઃ
કુરુરાજઃ । ય એષઃ,

મૌલીનિપાતચલકેશમયૂખજાલૈર્
ગાત્રૈર્ગદાનિપતનક્ષતશોણિતાર્દ્રૈઃ ।
યાત્યસ્તમસ્તકશિલાતલસન્નિવિષ્ટઃ
સન્ધ્યાવગાઢ ઇવ પશ્ચિમકાલસૂર્યઃ ॥ ૫૯॥

(ઉપસૃત્ય) ભોઃ કુરુરાજ ! કિમ્ ઇદમ્ ।

રાજા – ગુરુપુત્ર ! ફલમપરિતોષસ્ય ।

અશ્વત્થામા – ભોઃ કુરુરાજ ! સત્કારમૂલમાવર્જયિષ્યામિ ।

રાજા – કિં ભવાન્ કરિષ્યતિ ।

અશ્વત્થામા – શ્રૂયતાં,

યુદ્ધોદ્યતં ગરુડપૃષ્ઠનિવિષ્ટદેહં
અષ્ટાર્ધભીમભુજમુદ્યતશાર્ઙ્ગચક્રમ્ ।
કૃષ્ણં સપાણ્ડુતનયં યુધિ શસ્ત્રજાલૈઃ
સઙ્કીર્ણલેખ્યમિવ ચિત્રપટં ક્ષિપામિ ॥ ૬૦॥

રાજા – મા મા ભવાનેવમ્ ।

ગતં ધાત્ર્યુત્સઙ્ગે સકલમભિષિક્તં નૃપકુલં
ગતઃ કર્ણઃ સ્વર્ગં નિપતિતતનુઃ શન્તનુસુતઃ ।
શતં ભ્રાતૄણાં મે હતમભિમુખં સંયુગમુખે
વયં ચૈવમ્ભૂતા ગુરુસુત ધનુર્મુઞ્ચતુ ભવાન્ ॥ ૬૧॥

અશ્વત્થામા – ભો કુરુરાજ ।

સંયુગે પાણ્ડુપુત્રેણ ગદાપાતકચગ્રહે ।
સમમૂરુદ્વયેનાદ્ય દર્પોઽપિ ભવતો હૃતઃ ॥ ૬૨॥

રાજા – મા મૈવમ્ । માનશરીરા રાજાનઃ । માનાર્થમેવ મયા નિગ્રહો
ગૃહીતઃ । પશ્ય ગુરુપુત્ર !

યત્ કૃષ્ટા કરનિગ્રહાઞ્ચિતકચાદ્યૂતે તદા દ્રૌપદી
યદ્ બાલોઽપિ હતસ્તદા રણમુખે પુત્રોઽભિમન્યુઃ પુનઃ ।
અક્ષવ્યાજજિતા વનં વનમૃગૈર્યત્ પાણ્ડવાઃ સંશ્રિતા
નન્વલ્પં મયિ તૈઃ કૃતં વિમૃશ ભો ! દર્પાહૃતં દીક્ષિતૈઃ ॥ ૬૩॥

અશ્વત્થામા – સર્વથા કૃતપ્રતિજ્ઞોઽસ્મિ ।

ભવતા વાત્મના ચૈવ વીરલોકૈઃ શપામ્યહમ્ ।
નિશાસમરમુત્પાદ્ય રણે ધક્ષ્યામિ પાણ્ડવાન્ ॥ ૬૪॥

બલદેવઃ – એતદ્ ભવિષ્યત્યુદાહૃતં ગુરુપુત્રેણ ।

અશ્વત્થામા હલાયુધોઽત્રભવાન્ ।

ધૃતરાષ્ટ્રઃ – હન્ત સાક્ષિમતી ખલુ વઞ્ચના ।

અશ્વત્થામા – દુર્જય ! ઇતસ્તાવત્ ।

પિતૃવિક્રમદાયાદ્યે રાજ્યે ભુજબલાર્જિતે ।
વિનાભિષેકં રાજા ત્વં વિપ્રોક્તૈર્વચનૈર્ભવ ॥ ૬૫॥

રાજા – હન્ત કૃતં મે હૃદયાનુજ્ઞાતમ્ । પરિત્યજન્તિ મે
પ્રાણાઃ । ઇમેઽત્રભવન્તઃ શન્તનુપ્રભૃતયો મે પિતૃપિતામહાઃ ।
એતત્ કર્ણમગ્રતઃ કૃત્વા સમુત્થિતં ભ્રાતૃશતમ્ ।
અયમપ્યૈરાવતશિરોવિષક્તઃ કાકપક્ષધરો મહેન્દ્રકરતલમવલમ્બ્ય
ક્રુદ્ધોઽભિભાષતે મામભિમન્યુઃ । ઇમા ઉર્વશ્યાદયોઽપ્સરસો
મામભિગતાઃ । ઇમે મૂર્તિમન્તો મહાર્ણવાઃ । એતા ગઙ્ગાપ્રભૃતયો
મહાનદ્યઃ । એષ સહસ્રહંસપ્રયુક્તો માં નેતું વીરવાહી વિમાનઃ કાલેન
પ્રેષિતઃ । અયમયમાગચ્છામિ । (સ્વર્ગં ગતઃ)

(યવનિકાસ્તરણં કરોતિ)

ધૃતરાષ્ટ્રઃ –
યામ્યેષ સજ્જનધનાનિ તપોવનાનિ
પુત્રપ્રણાશવિફલં હિ ધિગસ્તુ રાજ્યમ્ ।

અશ્વત્થામા –
યાતોઽદ્ય સૌપ્તિકવધોદ્યતબાણપાણિઃ
ગાં પાતુ નો નરપતિઃ શમિતારિપક્ષઃ ॥ ૬૬॥

(નિષ્ક્રાન્તાઃ સર્વે)
ઊરુભઙ્ગમવસિતમ્ ।
શુભં ભૂયાત્ ।

Encoded and proofread by Arun questions.sanskrit@gmail.com

*Urubhangam by Bhasa*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*